# गतिबुद्धि. सूत्रे वार्तिकानि

**नीवह्योर्न** – नाययति वाहयति वा भारं भृत्येन।

**नियन्तृकर्तृकस्य वहेरनिषेधः** – वाहयति रथं वाहान् सूतः।

**आदिखाद्योर्न** – आदयति खादयति वान्नं वटुना।

**भक्षेरहिंसार्थस्य न** – भक्षयत्यन्नं वटुना।

अहिंसार्थस्य किम्? भक्षयति बलीवर्दान् सस्यम्।

**जल्पतिप्रभृतीनामुपसंख्यानम्** – जल्पयति भाषयति वा धर्मं पुत्रं देवदत्तः। (जल्पतिप्रभृतयः – जल्पति विलपति आभाषते)

**दृशेश्च** – दर्शयति हरिं भक्तान्। सूत्रे ज्ञानसामान्यार्थानामेव ग्रहणं न तु तद्–विशेषार्थानाम्, अतः 'स्मरति, जिघ्रति' इत्यादेर्न।

**शब्दायतेर्न**– शब्दाययति देवदत्तेन– ध्वनिः शब्दः – इति तात्पर्यमत्र।

'शब्दकर्मकाः' इत्यत्र तु– प्रतीतपदार्थको ध्वनिः शब्दः' इति भवति। अतः शब्दः कर्मकारकं येषां, ते तत्र गृह्यन्ते।

# इक्–श्तिपौ धातुनिर्देशे

# हृक्रोरन्यतरस्याम्

हृञ् हरणे, डुकृञ् करणे च – इत्येतयोः धात्वोः अण्यन्तावस्थायाः यः कर्ता, सः णौ विकल्पेन कर्मसंज्ञको भवति।

**उदाहरणानि–**

**१. स्वामी भृत्यं /भृत्येन कटं हारयति।**

**२. अश्वपालकः सैन्धवैः / सैन्धवान् तृणम् अभ्यवहारयति।**

**३. स्वामी शिल्पिनं / शिल्पिना कटं कारयति।**

**४. स्वामी शिल्पिनं / शिल्पिना कटं विकारयति।**

**– हृ, अभ्यवहृ, विहृ, संहृ, परिहृ, उदाहृ.....**

**– कृ, विकृ, संस्कृ, परिष्कृ......**

# अभिवादिदृशोरात्मनेपदे वेति वाच्यम्

❖इदं वार्तिकम् अपि सूत्रेण विहितं कार्यं विकल्पेन करोति। तद्यथा–

❖**आत्मनेपदिनः अभि-उपसर्गपूर्वकस्य 'वद सन्देशवचने इति धातोः तथा च दृश्धातोः अण्यन्तावस्थायाः कर्ता, ण्यन्तावस्थायां विकल्पेन कर्मसंज्ञां प्राप्नोति।**

❖उदाहरणम्–

| **अण्यन्तावस्था** | **ण्यन्तावस्था** |
|---|---|
| ❖भक्तः देवम् अभिवदति। | **गुरुः भक्तं/भक्तेन देवम् अभिवादयते।** |
| | **गुरुः भक्तेन देवम् अभिवादयति।** |
| ❖भक्तः देवं पश्यति। | **आचार्यः भक्तं/भक्तेन देवं दर्शयते।** |
| | **आचार्यः भक्तं/ देवं दर्शयति।** |

❖**ध्यातव्यम्** :- परस्मैदिनः दृश्धातोः प्रयोगे तु नित्येन कर्मसंज्ञा – 'दृशेश्च' इति वार्तिकेन।

# आधारस्य कर्मत्वम्

## अधिशीङ्स्थासां कर्म

**सूत्रार्थः** –

अधिउपसर्गपूर्वकाणां 'शीङ् स्वप्ने, ष्ठा गतिनिवृत्तौ, आस उपवेशने' इत्यतेषां धातूनाम् आधारः कारकं सत् कर्मसंज्ञको भवति।

**उदाहरणानि** :–

हरिः वैकुण्ठम् अधिशेते।

अहं स्वगृहम् अधितिष्ठामि।

## अभिनिविशश्च

**सूत्रार्थः** –

अभि–नि–इति–उपसर्गद्वयपूर्वकस्य विश्धातोः आधारः कारकं सत् कर्मसंज्ञको भवति। अभिनिवेशः = आग्रहः

**उदाहरणानि** :–

अभिनिविशते सन्मार्गम्।

अभिनिविशते संस्कृतम्।

– परिक्रयणे सम्प्रदानमन्यतरस्याम् दति सूत्रात् मण्डुकप्लुत्या 'अन्यतरस्याम्' इति आयाति, अतः इयं व्यवस्थितविभाषा, अतः क्वचिन्न–

–पापेऽभिनिवेशः।

– एष्वर्थेषु अभिनिविष्टानाम्।

# उपान्वध्याङ्वसः

**सूत्रार्थः -**

उप, अनु, अधि, आङ् - एते उपसर्गाः यदि वस्धातोः पूर्वे स्युः, तर्हि तस्य योगे आधारस्य कर्मसंज्ञा भवति।

**उदाहरणानि :-**

हरिः वैकुण्ठम् उपवसति।

**वार्तिकम्- अभुक्त्यर्थस्य न।**

यदा तु- उप-पूर्वको वस् धातुः भोजन-निवृत्त्यर्थको भवति, तदा आधारस्य न कर्मसंज्ञा।

यथा- वने उपवसति।

# अन्यपूर्विका द्वितीया- उपपदविभक्तिः

**उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु।**
**द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते॥**

उपर्यादयः - उपरि , अधि, अधः।

'उपरि उपरि' - अत्र परं रूपम् आम्रेडितम् अस्ति- 'तस्य परमाम्रेडितम्' इति सूत्रम्।

**उदाहरणानि :-**

कृष्णम् उभयतः गोपाः सन्ति।

कृष्णं सर्वतः गावः सन्ति।

धिक् स्वार्थिनम्।

लोकम् उपर्युपरि हरिः वर्तते।

लेकम् अध्यधि।

**अभितःपरितःसमयानिकषाहा-प्रतियोगेऽपि**

अभितः कृष्णम्।

परितः कृष्णम्।

ग्रामं समया = समीपे।

निकषा लङ्काम्।

हा कृष्णाभक्तम्।

बुभुक्षितं न प्रतिभाति किञ्चित्।